# 2020

## SANSKRIT — HONOURS

**Paper : CC-5**

**(Classical Sanskrit Literature – Drama)**

**Full Marks : 65**

*The figures in the margin indicate full marks.*

*Candidates are required to give their answers in their own words as far as practicable.*

**Section – A**

**(Marks : 25)**

**Unit - I**

**1.** (a) अधोलिखितयोः यथेच्छ**मेकस्य** मातृभाषया अनुवादः कार्यः। 5

(i) परिहरतु भवान् नृपापवादं
न परुषमाश्रमवासिषु प्रयोज्यम्।
नगरपरिभवान् विमोक्तुमेते
वनमभिगम्य मनस्विनो वसन्ति।।

(ii) पद्मावती बहुमता मम यद्यपि रूपशीलमाधुर्यैः।
वासवदुत्ताबद्धं न तु तावन्मे मनो हरति।।

(b) अधोलिखितयोः यथेच्छ**मेकस्य** संस्कृतभाषया देवनागरीलिप्या च सप्रसङ्गं व्याख्या कार्या। 6

(i) प्रद्वेषो बहुमानो वा सङ्कल्पादुपजायते।
भर्तृदाराभिलाषित्वादस्यां मे महती स्वता।।

(ii) कालक्रमेण जगतः परिवर्तमाना
चक्रारपङ्क्तिरिव गच्छति भाग्यपङ्क्तिः।।

(c) अधोलिखितेषु **त्रयाणामु**त्तरं संस्कृतभाषया देवनागरीलिप्या च संक्षेपेण देयम्। 2×3

(i) क एव यौगन्धरायणः? स्वप्नवासवदत्तनाटके कस्मिन् कस्मिन् अङ्के स एव दृश्यते?

(ii) तपोवनस्य किमपि परिचितिचिह्नद्वयं लिख्यताम्।

(iii) स्वप्नवासवदत्तमिति नाटकस्य कस्मिन् अङ्के ब्रह्मचारी अवतीर्णः? कुतः स आयातः?

(iv) 'भर्तृदारिके दत्तासि' – केनोक्तम्? का कस्मै दत्ता?

(v) न्यासस्य रक्षणं कीदृशं भवति?

Please Turn Over

### Unit - II

**2.** अधोलिखितयोः कस्यचित् ***एकस्य*** उत्तरं देयम्। 8

(a) स्वप्नवासवदत्तम् इति नाटकस्य अन्तिमाङ्के प्राप्तं मिलनदृश्यं वर्ण्यताम्।

(b) संस्कृतसाहित्ये या ''भाससमस्या'' इति कथिता तद्विषये संक्षेपेण आलोच्यताम्।

### Section – B

### (Marks : 25)

### Unit - I

**3.** अधोलिखितेषु **द्वयोः** संस्कृतभाषया देवनागरीलिप्या च टीका लेखनीया। 5×2

(a) विदूषकः

(b) नटी

(c) प्रवेशकः

(d) कुलपतिः।

### Unit - II

**4.** (a) अधोलिखितयोः कस्यचित् ***एकस्य*** मातृभाषया अनुवादः कार्यः। 5

(i) न खलु न खलु बाणः सन्निपात्योऽयमस्मिन्
मृदुनि मृगशरीरे तूलराशाविवाग्निः।
क्व वत हरिणकानां जीवितश्चातिलोलं
क्व च निशितनिपाता वज्रसाराः शरास्ते।।

(ii) शुश्रूषस्व गुरून् कुरु प्रियसखीवृत्तिं सपत्नीजने
भर्तुर्विप्रकृतापि रोषणतया मास्म प्रतीपं गमः।
भूयिष्ठं भव दक्षिणा परिजने भोगेष्वनुत्सेकिनी
यान्त्येवं गृहिणीपदं युवतयो वामाः कुलस्याधयः।।

(b) अधोलिखितयोः कस्यचित् ***एकस्य*** संस्कृतभाषया देवनागरीलिप्या च सप्रसङ्गं व्याख्या कार्या। 6

(i) यात्येकतोऽस्तशिखरं पतिरोषधीनाम्
आविष्कृतोऽरुणपुरःसर एकतोऽर्कः।
तेजोद्वयस्य युगपद् व्यसनोदयाभ्यां
लोको नियम्यत इवैष दशान्तरेषु।।

(ii) सरसिजमनुविद्धं शैवलेनापि रम्यं
मलिनमपि हिमांशोर्लक्ष्म लक्ष्मीं तनोति।

इयमधिकमनोज्ञा वल्कलेनापि तन्वी
किमिव हि मधुराणां मण्डनं नाकृतीनाम्॥

(c) (i) कस्यचित् ***एकस्य*** विग्रहवाक्यं प्रदाय समासनाम संस्कृतभाषया देवनागरीलिप्या च लिख्यताम्। 2

वज्रसाराः 4 (a) (i) प्रश्ने।

सरसिजम् 4 (b) (ii) प्रश्ने।

(ii) संस्कृतभाषया देवनागरीलिप्या च कस्यचित् ***एकस्य*** व्युत्पत्तिः निर्णेया। 1

शुश्रूषस्व 4 (a) (ii) प्रश्ने।

आविष्कृतः 4 (b) (i) प्रश्ने।

(iii) संस्कृतभाषया देवनागरीलिप्या च कस्यचित् ***एकस्य*** कारकविभक्तिः निर्णेया। 1

मृदुनि 4 (a) (i) प्रश्ने।

शैवलेन 4 (b) (ii) प्रश्ने।

## Section – C
## (Marks : 15)
## Unit - I

**5.** अधोलिखितयोः कस्यचित् **एकस्यो**त्तरं संस्कृतभाषया देवनागरी लिप्या च देयम्।

(a) मातलिः कस्य सारथिः? कथं स दुष्यन्तसकाशं प्रेरितः? पुत्रेण सह दुष्यन्तस्य मिलनदृश्यमानुपूर्वं वर्ण्यताम्। 1+2+7

(b) हंसपदिका का? नाटकस्य कस्मिन् अङ्के तस्याः गानं वर्तते? नाटके तद्गानस्य तात्पर्यं पर्यालोच्यताम्। 1+1+8

***अथवा***

अधोलिखितेषु ***पञ्चप्रश्नाः*** समाधेयाः सुरगिरा देवनागर्या लिप्या च। 2×5

(a) रक्षिपुरुषयोः नाम किम्?

(b) का सानुमती? अभिज्ञानशकुन्तलनाटकस्य कस्मिन् अङ्के रङ्गमञ्चे समवतारिता सा?

(c) किमर्थं धीवरवृत्तान्तः समवतारितः?

(d) कासीत् वसुमती? नाटके तस्याः उल्लेखमात्रमेव प्रवेशो वा?

(e) कस्तावत् सर्वदमनः? कुत्र तेन सह दुष्यन्तः मिलितः?

(f) शकुन्तलनाटकस्य परिसमाप्तिः कस्मिन् आश्रमे? कुत्र तस्य अवस्थानम्?

(g) केन सह युद्धार्थमिन्द्रेण दुष्यन्तः आहूतः?

## Unit - II

**6.** अधोलिखितेषु **पञ्चानां** प्राकृतशब्दानां संस्कृतरूपं देवनागरीलिप्या लिख्यताम्। 1×5

(a) अज्जस्स

(b) अणज्ज

(c) अत्तणो

(d) राअउलम्

(e) दाव

(f) जादे

(g) तह।